श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला – ११

४९ तमम् अखिलभारतीयप्राच्यविद्यासम्मेलनम्

49th SESSION OF ALL INDIA ORIENTAL CONFERENCE

# प्रज्ञापीयूषम्

Summaries of Research Papers




Organized by

**Shree Somnath Sanskrit University**

Rajendra Bhuvan Road, Veraval-362 226

Scanned with CamScanner

श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - ११

# प्रज्ञापीयूषम्

# Prajñāpīyūṣam

Shree Somnath Sanskrit University Grantha Series – 11

**49th SESSION OF ALL INDIA ORIENTAL CONFERENCE, VERAVAL**

**( 18 – 20 May, 2018 )**

# प्रज्ञापीयूषम्

## Summaries of Research Papers

Chief Editor

**Prof. Ark Nath Chaudhary**

*Vice-Chancellor, Shree Somnath Sanskrit University, Veraval*

Managing Editor

**Prof. D. N. Pandeya,** *Local Secretary,* 49th AIOC

Editors

**Dr. Janakisharan Acharya,** *Additional Local Secretary,* 49th AIOC

**Dr. Kartik Pandya,** *Research Officer*

Assistant Editor

**Shri Jigar Bhatt**

Organized by

**Shree Somnath Sanskrit University**

Rajendra Bhuvan Road, Veraval-362 226

प्रकाशकः

**प्रो. महेन्द्रकुमार अं. दवे**

का. कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी,

राजेन्द्रभुवनमार्गः, वेरावलम् – ३६२ २६६ गीर-सोमनाथजनपदम् (गुजरातम्)

दूरभाषः – 02876 – 244532, फेक्स – 244417

www.sssu.ac.in

**शोधसारप्रकाशनसमितिः**

१. प्रो. देवेन्द्रनाथ पाण्डेय

२. डॉ. कार्तिक पण्ड्या

३. डॉ. जानकीशरण आचार्य

४. श्री अनिरुद्ध पण्ड्या

५. श्री जिगर भट्ट

**© श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

The statements and views expressed by the scholars/authors of abstract (summaries) in this compendium are their own and not necessarily of the Editors.

प्रथमसंस्करणम् – May, 2018 - 1000 प्रतिरूपाणि

**ISBN : 978-93-83097-28-9**

मुद्रकः

Harikrushna Graphics – Ahmedabad

Mobile: 98799 61789, 98258 50559

# EXORDIUM

Oriental language and literature are the original academic voice and vibration of the Asian countries. This is the inspiration and expression of that topography in which the ambassadors of nature incarnated as Vedic seers, prophets and religious teachers on this pious land who taught the seminal elements of world philosophies, literature and metaphysics –the main sources of natural science. The **Vedic** literature and **Zend - Avesta** are the foremost store house books of original thoughts of our ancestors, streamed out today in multi facets of literary wealth. It is here worthy to remind that in the 18th Century a mission propelled by the curiosity of the world scholars to know more about the Sanskrit language and literature started. This mission acted upon and presented some extraordinary Sanskrit manuals important for the scientific study. The world scholars of oriental learning felt a need of a creative institution that might provide occasion to assemble the men of letters to discuss the subjects related to the oriental learning for the purpose of research in the field of Indian literature mostly based on the Sanskrit literature. This caused the establishment of the institution – INTERNATIONAL CONGRESS OF ORIENTALISTS. This congress took place at various places beyond Indian Territory and gained applaud.

This was the main exhorting ground of beginning of the **All India Oriental Conference** that was instituted first in **1919** in Shimla, Himachal Pradesh with the combined great efforts of **Sir R. G. Bhandarkar**. Of that first conference the president was **Sir Bhandarkar** worked in the capacity of Secretary. After that it was held in Culcutta in **1922**. The president of that session of A.I.O.C. was **Sylvan Levi** of Paris and in 1924 it was held at Madras. **Dr. Ganganath Jha** was the president of the Session. Thus a number of prominent Sanskrit scholars have been attached with the most ambitious A.I.O.C. and of course the conference has paved the way for **scientific research culture** in the field of Sanskrit language and literature that includes a number of subjects and languages of learning. Today near about **21 sections** of the different subjects in various languages are included in its mission of study and research. It opens the flexible door for inclusion of all humanitarian subjects.

It is worthy to know that the oriental learning basically reflects the wider range of ancient studies of Asian territory, started from the main source of knowledge. Although it is a very tedious business to trace it out exactly but on account of general perception coming out from the study of the ancient stock of literature we find some hints that the main source of knowledge has been the wisdom of the Vedic seers who have been called कविः and मनीषिः. The Rigveda appears as the oldest edify of the Seers' wisdom. The subject matters, significant words and the other elements available in the **Rigveda** lead us towards the original knowledge. The **Veda** delineates in a general way that applies to all human beings and speaks of a common platform for all people. Hence we are of the view that the veda as a literature includes all knowledge systems of world that stream out in the different streams, of language and literature. But today these all seem so detached from its main original centre so that diversion dominates world societies. But even today for the betterment of our world societies we may locate the natural unity among the world society on the ground of intellectual exercise of the oriental subjects of study. To have the purpose cited above the tradition has been started by our orientalists of the immediate past. It is here notable that the All India Oriental Conference from his very cradle through its creative and critical efforts of its participants and

masterpiece personages has been producing a structural phenomenon of the past society. We may find the spirit of the oriental study standing as a nucleus element that bursts out in the form of contemporary science and technology developed if its internal activities and reaction understood. It is here worthy to mention that oriental system of knowledge is of course the basic ground that keeps the system of modern research mechanism controlled. Reflecting this point in his literary acumen **Tenyson** says –

**"The old order changeth yielding place to new,**
**And God fulfils himself in many ways;**
**Lest one good custom should not corrupt the world"**

That means all works of knowledge is for beatitude of our life and for protection of human life values. And it is our fruitful life supported by old life system that shows the right way of walking on in present and future. For instance, if the Rigveda through **Aksha Sookta** = The Hymn of Gambling delineates the allegoric sense of bad effect of gambling then it comes that its addiction brings pangs and poverty in a family with other immoral evils to destruct peace and prosperity and natural bliss of human life that even today we find relevant for our society. And this thing is more or less hinted by other literature of the old rank also. After all it shows that with all modern ways of study of science and technology, **the oriental study** is also the most important way to teach to world a lession of real peace and bliss for human beings. It is here worthy to reflect that **Asian study** that represent not only variable colloquial oriented literary wealth but also it produces a very great ancient civilization and cultural heritage related to the significant theory of world creation and old panorama of human mind approach, to the world society.

Hence treading on traditional path of the All India Oriental Conference commenced by our past scholars, our respected Vice-Chancellor of Shree Somnath Sanskrit University took the opportunity to organize the **49th session** of the same on its pious premise of the University and we were thereafter being employed for better management regarding the organization of the conference, stood girded up. But it is worthy to mention that this type of conference needs huge monetary funding. Hence the financial matter was a major issue to be tackled. And we are very grateful to our respected Vice-chancellor who came forward and engaged in contacts of suitable institutions and persons to solve the financial problem. Ultimately his honor gained the mouse by his incessant visits and efforts.

In the next phase, A meeting was called to set up the various committees including the advisory committee and working committee. The associated other processes started and by the grace of Lord Somnath the mission moved ahead by the hard working and devotion of the University family members. It was supported by the **Government of Gujarat** and the great personages of the whole Gujarat.

### Expectations

The 49th session of the All India Oriental Conference-2018, will appear with some significant outcome of the mission of research mechanism in the following terms –

(1) The participants will be presenting their qualitative research papers in different disciplines such as Vedic Science, Classical Sanskrit Literature, Indian Philosophy, Dharma Shastra and the like.

(2) The participating scholars of Iranian studies and Arabian studies through their valuable

research papers will come on the common platform of our Indian literary- findings with an open comparative approach to prove our common blood and breath, common civilization of Asia through their new findings.

(3) Through the **21 sections** and sectional presidents, various subject explored as a new knowledge bank will of course be leading us towards further research works.

(4) Through study of modern Sanskrit and the technical subjects, the conference will produce the linkage of old literary elements and scientific thoughts with the modern subjects of study.

(5) The research papers in **Asian, Persian and Islamic studies** presented by the concerning scholars will be very fruitful for the encouragement of the Indian students.

## Main features of the All India Oriental Conference-2018

The main features of the A.I.O.C. 2018 to be taken place are –

(1) The cultural activities that includes, the traditional dance of Kuchipudi by Dr.Nalini Joshi - a fine artiste.

(2) Sanskrit Dramas.

(3) **The Pandit Parishad**.

## Thanks and greetings

As we must be aware of, that it is our society, social men and self interest less Saints who always stand ready for the help of the Social and academic events.

It is here notable that the institutions that came to help are the Somnath Trust (Somnath), Santram Mandir (Nadiyad), Bochasanvasi Akshar Purushottam Sanstha (BAPS) (Ahmedabad), Shree Swaminarayan Gurukul Vishwavidya Pratishtthanam (Chharodi-Amadabad), Shri Chitrakuta Dhama (Mahua) and Grasim Industries Unit–Rayon (Veraval). We extend our greetings and thanks on the part of the University to these institutions and corporate sector. Addition to that we also express our deep sense of gratitude and thanks to Prof. Pankaj L. Jani Ji, Hon'ble Vice-Chancellor of Dr. Baba Saheb Ambedkar Open University (Ahmadabad), Prof. Gautambhai Patel, Shree P.K. Laheri Ji ( I.A.S) for their help and support. Our special thanks go to Prof. P. N. Shastriji, Hon'ble Vice-Chancellor of Rashtriya Sanskrit sansthan (New Delhi) also for providing financial assistance for the events of the 49$^{th}$ Session of All India Oriental Conference-2018.

The University is working incessantly with devotion for the successful execution of the A.I.O.C. 2018 and tries its best to provide comfortable hospitality of the guests regarding boarding and lodging, yet if there happens any lacunae in our arrangement and management of the events then please pardon me.

Next to that we express our deep sense of gratitude and soft mused words of thanks to respected Prof. Sarojaji Bhate, General Secretary, All India Oriental Conference-2018 and for Prof. Chandrakant Shukla, General President, 49$^{th}$ session of the All India Oriental Conference.

At last but not the least, we here by express our spontaneous deep sense of greet to the various sectional presidents, participants, officials of the conference and all persons who have been contributing their roles for the better execution of the A.I.O.C.2018 directly and indirectly.

We want not to forget to extend our thanks also to the respected President, Veraval-Patan Joint Municipality, Veraval city and the respected D.M., D.D.O., A.D.M., I.G., D.I.G., S.P. and D.S.P of Veraval who have been providing the security and other needs of the conference. We endow them all personalities mentioned above with sweet words of thanks and greetings.

With warm regards to all.

**Prof. D. N. Pandeya**
*Local Secretary*

**Dr. Janakisharan Acharya**
*Additional Local Secretary*

# अध्यक्षीयमभिभाषणम्

## प्रो. चन्द्रकान्त शुक्लः

मान्यमान्याः मुख्यातिथयः, नवचत्वारिंशत्तमस्यास्य प्राच्यविद्या-सम्मेलनस्योपाध्यक्षाः पद्मश्रीसम्मानेन समलङ्कृताः रमाकान्तशुक्लमहोदयाः, सम्मेलनस्यास्य महासचिवाः महामान्याः सरोजाभाटेमहाभागाः, श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतिपदमलङ्कुर्वाणाः अर्कनाथचौधरीमहोदयाः, मञ्चस्थाः अन्ये समादरणीयाः अतिथयः, सभामण्डपे विराजमानाः सुहृदः प्रतिनिधयः, विद्वांसः विदुष्यश्च।

नमः पूर्वेभ्यः पथिकृद्भ्यः। नवनवतिवर्षेभ्यः प्रवर्तमानस्यास्य सम्मेलनस्य ऋषिकल्पेभ्यः पथप्रदर्शकेभ्यः सर्वप्रथममयं जनः नमोवाकं प्रशास्ते तदनु प्राच्यविद्यासम्मेलनस्य सदस्यान् प्रति कार्तज्ञ्यं प्रकटयति उपस्थितेभ्यः स्वागतञ्च व्याहरति। पदप्रदर्शकानां नामस्मरणमात्रेणाप्यपायानां प्रशमनं भवितुमर्हति। तेषु केचन उल्लेख्याः सन्ति- आर० जी० भण्डारकरः, सिल्वाँ लेवी, गङ्गानाथ झा, जे०जे० मोदी, काशीप्रसाद जायसवालः, एस० के० आय्यंगरः, एफ० डब्लू० थामस, महामना मदनमोहन मालवीयः, गुलाम याजदानी, एस० के० बेल्वेल्करः, भारतरत्नं पी०वी०काणे, आर०सी० मजुमदारः, एस० के० दे, सर्वपल्ली राधाकृष्णन्, ए० एस० अल्तेकरः, वी०वी० मिराशी, वी० राघवन्, वासुदेवशरण अग्रवालः, ए० एन० उपाध्ये, विश्वबन्धु शास्त्री, पी०एल० वैद्यः, डी० सी० सरकारः, पी०वी० बापटः, नीहार रञ्जन रे, गौरीनाथ शास्त्री, आर० एन० दाण्डेकरः, रमारञ्जन मुखर्जी, प्रभाकर नारायण कवठेकरः, के० कृष्णमूर्तिः, जयमन्त मिश्रः, प्रभुदयालु अग्निहोत्री, अनन्तलाल ठक्कुरः, विद्यानिवास मिश्रः, कृष्णकान्त चतुर्वेदी, अभिराजो राजेन्द्र मिश्रः, सतीशचन्द्र झा, सत्यव्रत शास्त्री, जानकीवल्लभ पटनायकः, राधावल्लभ त्रिपाठी, महावीर अग्रवालप्रभृतयः। महासचिवेषूल्लेख्याः सन्ति- पी०डी० गुणे, अमरनाथ झा, एस० के० आय्यंगरः, एस० के० दे, ए० एस० अल्तेकरः, एस०डी० जोशी, सरोजा भाटे प्रभृतयः। आर० एन० दाण्डेकरमहोदयस्तु भीष्मपितामहवदुल्लेख्योऽस्ति।

सम्मेलनमिदं देवाधिदेवस्य सोमनाथस्य पादारविन्दयोः अधः सञ्जायमानमस्ति। विद्याक्षेत्रेपि प्रथितयशसः गुजरातप्रदेशस्य कोणेऽस्मिन् विद्यमानमिदं क्षेत्रं भगवतः सोमनाथस्य चन्द्रिकया भारतस्य तमः अपनयति। एष प्रदेशः पौराणिककालत एवानर्तलाटावन्त्यानूपसौराष्ट्रकच्छादिभिः समलङ्कृतः स्वकीयामाभां वितनोति। प्रदेशोऽयं वैष्णवातिरिक्तं शैवजैनबौद्धसम्प्रदायानाञ्च भूमिरस्ति यत्र वलभीक्षेत्रं विशेषतया बहुकालपर्यन्तं विद्याभूमिरूपेणोल्लेख्यमासीत्। विक्रमनिर्वाणस्य षट्त्रिंशदधिकशत-वर्षानन्तरमेवात्र भद्रबाहोः शिष्येण जिनचन्द्रेण श्वेताम्बरस्य स्थापना विहिता आसीत्, परं विशेषतया स्थानमिदं हीनयानसम्प्रदायस्याध्ययनक्षेत्रमासीत्। पश्चिमगुजरातस्य भावनगरक्षेत्रे षष्ठे शतके स्थापितमिदं विद्याकेन्द्रं द्वादशशतकपर्यन्तमुन्नतशिखरे विराजते स्म। तत्र षट्सहस्रच्छात्राणामध्ययनस्य व्यवस्था आसीत्, यत्र शताधिकाः विहाराः आसन्। अत्रैव गुणमतिः स्थिरमतिश्च बौद्धग्रन्थान् विरचितवन्तौ। विश्वविद्यालयस्यास्य संवर्धनं गुर्जरप्रदेशस्य सम्पन्नैः जनैः भवति स्म। मैत्रकनरेशानां काले तु विद्याकेन्द्रस्याभिवृद्धिः स्मरणीयास्ति। अस्य महत्त्वमाकलयन् दशकुमारचरितेऽपि लिखितमस्ति-**"अस्ति सौराष्ट्रेषु वलभीनाम नगरी। तस्यां गृहगुप्तनाम्नो गुह्यकेन्द्रतुल्यविभवस्य नाविकपतेर्दुहिता रत्नवती नाम।"** (दशकुमारचरितम्, पृ० 358, चौखम्बा, 1965)।

अनेनोद्धरणेन ज्ञायते यत् क्षेत्रमिदं विभवसम्पन्नवतां व्यापारिणामप्यासीत्। कथमिदं विद्याकेन्द्रमासीदित्यस्मिन् विषये कथासरित्सागरे सङ्केतितमस्ति-

**स विष्णुदत्तो वयसा पूर्णषोडशवत्सरः।**
**गन्तुं प्रवर्तते विद्याप्राप्तये वलभीं पुरीम्।।**

(कथासरित्सागरः, पृ० 141, निर्णयसागरः)

ह्वेनसांगः विस्तरेण वलभीविषये वर्णयति कथयति च यत्तत्र संघारामेषु प्रायः षट्शतभिक्षवः पठन्ति स्म। तस्मिन् समये चीनदेशे वलभीनालन्दाकेन्द्रयोः चर्चा भवति स्म। अष्टमशतके मैत्रकनरेशानां काले विद्याक्षेत्रं वलभी एव आनर्तसौराष्ट्रयोः राजधान्यासीत्। मैत्रकाणां समये आनर्तपुरम् (सम्प्रति वडनगरम्) वेदस्य शाखानामपि अध्ययनकेन्द्रमासीत्। रुद्रदाम्नः शिलालेखानुसारं क्षत्रपः स्वयमपि राजनीतिशास्त्रपर्यायभूते अर्थविद्यातिरिक्तं शब्दगान्धर्वन्यायविद्यानामपि पण्डितः आसीत्। वलभीक्षेत्रतः प्राप्तैः शिलालेखैः ज्ञायते यत्तस्मिन् काले संस्कृतं राजभाषापदे विराजते स्म।

लाटदेशवास्तव्यो दुर्गाचार्यः निरुक्तोपरि ऋज्वर्थवृत्तिं रचयामास। ऋग्वेदस्य भाष्यकाराः स्कन्दस्वामिनोऽपि अस्यैव प्रदेशादिति स्वीक्रियते। आनर्तपुरे आनन्दपुरे वा वेदानां ध्वनिः सर्वत्रापि श्रूयते स्म इति सूच्यते। एकादशशतके अत्रैव द्याद्विवेदः नीतिमञ्जरीग्रन्थमारचितवान्। गुर्जरप्रदेशे बहुविधशास्त्रवित् श्वेताम्बरसम्प्रदायानुयायी हेमचन्द्रो जातः। व्याकरणशास्त्रदृष्ट्या तेन लघुवृत्तिबृहद्वृत्तिसहितञ्च शब्दानुशासनं व्यरचि। सः शब्दमहार्णवन्यासलिङ्गानुशासनोणादिगणविवरणधातुपारायण-विवरणातिरिक्तं व्याकरणस्य विविधान् ग्रन्थान् रचयामास। अलङ्कारचूडामणिविवेकवृत्तिद्वयसहितं तेन काव्यानुशासनमपि रचितम्। हेमचन्द्रस्यैव शिष्यद्वयेन रामचन्द्रगुणचन्द्रेण प्रसिद्धं नाट्यदर्पणं विरचितम्। गणरत्नमहोदधेः रचयिता वर्धमानसूरिः प्रदेशेऽस्मिन्नेव जन्म लेभे। पञ्चग्रन्थिव्याकरणनाम्ना प्रसिद्धस्य बुद्धिसागरव्याकरणस्य कर्ता बुद्धिसागरोऽपि प्रशंस्योस्ति। स्वयं नृपतिः कुमारपालः गणदर्पणव्याकरणस्य रचनां कृतवानिति कथ्यते। त्रयोदशशतके गुर्जरनृपतेः विशालदेवस्य सभाकविः अमरचन्द्रसूरिः स्यादिशब्दसमुच्चयनाम्ना ग्रन्थमकरोत्। गुणचन्द्रसूरिणा पञ्चदशशतकस्यारम्भे क्रियारत्नसमुच्चयनाम्ना व्याकरणग्रन्थः विरचितः। वाग्भटालङ्कारस्य रचयिता वाग्भटः द्वादशशताब्द्यामुद्भूत इति मन्यते। त्रयोदशशताब्द्यां नरेन्द्रप्रभसूरिमहोदयः अलङ्कारमहोदधिं विरचितवान्। कविशिक्षादृष्ट्या विविधाः ग्रन्थाः गुजराते विरचिताः ये काव्यशास्त्रानुसारं वैशिष्ट्यमावहन्ति यत्र कविवर्गस्य कृते परामर्शाः विराजन्ते। एते ग्रन्थाः यायावरीयस्य राजशेखरस्य काव्यमीमांसां स्मारयन्ति। वादि देवसूरेः शिष्यः जयमङ्गलसूरिः काव्यशिक्षानाम्ना एकं ग्रन्थं व्यलेखि। इत्थमेव अमरचन्द्रसूरिरपि काव्यकल्पलतानाम्ना भाष्यसहितं काव्यशिक्षाग्रन्थमरचयत्। अमरचन्द्रसूरिः स्वयं स्वीकरोति यत्तस्य ग्रन्थोपरि अरिसिंहस्य कवितारहस्यस्य प्रभावोस्ति। लाटदेशस्यैव लाटीरीतिः भोजराजेन सरस्वतीकण्ठाभरणे उल्लिखितास्ति।

वैयाकरणो बुद्धिसागरः छन्दःशास्त्रग्रन्थमपि रचितवान्। इदं तु प्रसिद्धमेवास्ति यद् हेमचन्द्रः शब्दानुशासनकाव्यानुशासनातिरिक्तं छन्दोनुशासनमपि विरचितवान् यत्र संस्कृतातिरिक्तं प्राकृतापभ्रंशयोरपि छन्दांसि विवेचितानि सन्ति परं तत्र वैदिकछन्दसां स्थानं नास्ति। अमरचन्द्रसूरिरपि छन्दोरत्नावलीनाम्ना ग्रन्थमारचितवान्।

आचार्यो हेमचन्द्रः अमरकोशसदृशम् अभिधानचिन्तामणिनाममालाग्रन्थमपि रचितवानस्ति। तस्य लिङ्गानुशासनमपि प्रसिद्धा रचना विद्यते। अत्र संस्कृतातिरिक्तं प्राकृतापभ्रंशदेशीभाषाणामपि केचन शब्दाः विवेचिताः सन्ति, येषां मूलं संस्कृते विराजते। तस्य एका अपरा रचना अनेकार्थसंग्रहोऽपि उल्लेख्या, यत्र एकस्य शब्दस्यानेके अर्थाः प्रतिपादिताः सन्ति। देशीनाममाला रयणावलीनाम्ना वा तेन देशीशब्दसंग्रहोऽपि व्यरचि। तस्य निघण्टुशेषनामकः कोशग्रन्थः ओषधीयपादपानां संग्रहरूपेणास्ति। विशालदेवस्य सभापण्डितः अमरचन्द्रसूरिः एकाक्षरनाममालिकानाम्ना एकविंशतिपद्येषु एकाक्षरकोशं रचितवान्।

अत्रैवाहमेकस्य नूतनस्यैकाक्षरकोशस्योल्लेखं कर्तुमीहे। वर्षत्रयपूर्वमहमदाबादस्थेन एकविंशतिवर्षदेशीयेनैकेन जैनमुनिना मुनिश्रीराजसुन्दरविजयेन सुन्दरैकाक्षरकोशनाम्ना एकः एकाक्षरकोशो विनिर्मितः। ये एकाक्षरकोशग्रन्थाः सम्प्रत्युपलभ्यन्ते तेषु एतावत्प्रमाणेनार्थानां विवरणं नैव दृश्यते। तस्य 'ठ'वर्णस्य प्रविष्टिविषये मदीया सम्मतिः स्वीकृतासीत्। केवलं ठवर्णदृष्ट्यैवात्र दशाधिकशताभिप्रायाः विवेचिताः सन्ति। न केवलमत्राभिप्रायप्रकटनमेव विराजते, अपितु स्वनिर्मितायां पुण्यसौम्यावृत्त्यां प्रत्येकस्याभिप्रायप्रकटने अन्ये एकाक्षरकोशनिर्मातारः किमुक्तवन्तः सन्तीत्यस्यापि प्रायः सङ्कलनं विहितमस्ति मुनिना। कोशग्रन्थेऽस्मिन् 616 श्लोकाः सन्ति। निश्चयेन मुनिवर्योपि वन्दनीयः तस्य ग्रन्थोऽपि वन्दनीयः। मुनिरयं मङ्गलाचरणं कुर्वन् निगदति-

**कलिकुण्डलेश्वरं नत्वा नुत्वा राजेन्द्रसद्गुरुम्।**
**करोत्येकाक्षरं कोशं बालेभ्यो बालसुन्दरः।।**

(श्रुतज्ञानसंस्कारपीठम्, कलिकुण्डतीर्थम्, नवरंगपुर, अहमदाबाद)

ज्योतिषशास्त्रदृष्ट्या गुर्जरस्य लाटदेशीयो लाटदेवः आर्यभटप्रथमस्यानुयायी आसीत् यो वराहमिहिरेण पञ्चसिद्धान्तिकायाम् अहर्गणगणनाप्रसङ्गे उल्लिखितोऽस्ति। एष सर्वसिद्धान्तगुरुनाम्ना ख्यातः आसीत्। चापराजवंशस्य

व्याघ्रमुखराजस्य समये भिल्लमल्लकाचार्यो ब्रह्मगुप्तः श्रीमाल इति क्षेत्रस्यासीत्, येन ब्रह्मस्फुटसिद्धान्तो रचितः। राज्ञः कुमारपालस्य काले ज्योतिषसामुद्रिकतिलकनाम्ना यो ग्रन्थः दुर्लभराजेनारब्धः सः तस्य पुत्रेण जयदेवेन पूर्णतां प्राप्तः यः स्वयमपि स्वप्नचिन्तामणिग्रन्थस्य रचयिता इति ज्ञायते। शकुनशास्त्रमभिलक्ष्य राज्ञः अजयपालसमये नरहरिः नरपतिजयचर्यास्वरोदायनाम्ना ग्रन्थमेकं विरचितवान्। ज्योतिःसाराभिधेयग्रन्थस्य रचयिता देवप्रभसूरेः शिष्योऽभवत् नरचन्द्रसूरिः।

जैनसम्प्रदायस्यानेके आचार्याः कवयो वा शास्त्राणां काव्यानां वा रचयितारोऽभवन्। आचार्यास्तु मुख्यरूपेण जैनदर्शनस्य सिद्धान्तान् स्थापितवन्तः तथैव कवयोऽपि विशेषतया स्वकाव्येषु जैनधर्मस्यैव चित्रणं कृतवन्तः यत्र श्वेताम्बरदिगम्बरसम्प्रदाययोः उल्लेखोऽस्ति। अनेकान्तवादसिद्धान्तस्य स्थापनार्थं वलभ्यां चतुर्थपञ्चमशताब्द्योर्मध्ये मल्लवाडिननामकः जैनधर्मानुयायी द्वादशारनयचक्रनाम्ना ग्रन्थं भाष्यसहितं व्यलेखि। जैनाचार्येषु हरिभद्रसूरिस्तु ख्यात एवास्ति यः अष्टमशतके अभूदिति स्वीक्रियते। तस्य षड्दर्शनसमुच्चयग्रन्थस्तु अन्येषामपि दार्शनिकसम्प्रदायानां विवेचनं विदधाति। भिन्नमालक्षेत्रे निवसन् सः विविधान् श्रीमालिराजपूतजनान् जैनधर्मे आनीतवान्। याकोबीमतानुसारं सः अर्धमागध्यां विरचितानां जैनागमानां संस्कृतभाषया भाष्यकाररूपेण प्राथम्येनोल्लेख्योस्ति। अनेकान्तजयपताकानामकेन ग्रन्थेन सः जैनदर्शनं श्रद्धया सिषेवे। कलिकालसर्वज्ञानोपाधिविभूषितो हेमचन्द्रः जैनन्यायदृष्ट्या प्रमाणमीमांसाग्रन्थमरचयत्। स एव द्विजवदनचपेटापरनाम्ना वेदाङ्कुशग्रन्थमपि कृतवान्। सप्तदशशतकस्य जैनाचार्यः यशोविजयो जैनतर्कभाषातिरिक्तमनेकेषां ग्रन्थानां रचयिता अस्ति। तस्य रचनाः सनातनधर्मेणापि प्रभाविताः सन्ति। यशोविजयस्यैव समकालिकस्य विनयविजयस्य लोकप्रकाशनामिका रचना जैनमतानुसारं ब्रह्माण्डं वर्णयति।

जैनसम्प्रदायदृष्ट्या अनेकानि नाटकानि गुजराते रचितानि सन्ति। तेषु मोहराजपराजयनाटकं प्रतीकनाटकातिरिक्तमैतिहासिकं नाटकमस्ति। नाटकस्यास्य रचयिता यशपालः राज्ञः अजयपालस्य मन्त्री आसीत्। कुमारपालानन्तरमजयपालः त्रयोदशशतकस्यारम्भे राज्यमकरोत्। नाटकस्यास्य प्रथमतया अभिनयः महावीरस्य यात्रामहोत्सवेऽभवदिति सूच्यते। नाटकस्य नायकः नृपतिः कुमारपाल एवास्ति। अनन्तरं वादिचन्द्रसूरिणा षोडशशताब्द्यां ज्ञानसूर्योदयनाटकं रचितम्। मोहराजपराजयनाटकं श्वेताम्बरसम्प्रदायस्यास्ति परं ज्ञानसूर्योदयनाटकं दिगम्बरसम्प्रदायस्य प्रातिनिध्यं करोति। प्रबोधचन्द्रोदयस्य विरोधे लिखितेऽस्मिन् नाटके ज्ञानसूर्यस्योदयः चित्रितोऽस्ति। ज्ञानसूर्योदस्याष्टशती प्रबोधचन्द्रोदयस्योपनिषदस्ति, तथैव प्रबोधचन्द्रोदयस्य दया अत्र श्रद्धा अस्ति। तत्र दया लुप्ता जातासीदत्र श्रद्धा लुप्ताभवत्। स्वशोधकार्यार्थं प्रयतितेऽपि ज्ञानसूर्योदयं नैव प्राप्तम्। परं नाथूराम प्रेमिणः हिन्द्यानुवादानुसारमस्य नाटकस्य रचना मधूकनगरे जातेति। नाटकेऽस्मिन् विरोधिसम्प्रदायानां खण्डनं विधाय दिगम्बरजैनसम्प्रदायस्य सिद्धान्तानां स्थापनमस्ति।

यशश्चन्द्रविरचितमेकं प्रकरणमस्ति मुदितकुमुदचन्द्र इति। बलदेवोपाध्यायः नाट्यकृतिविषये लिखति-**"यह प्रकरण एक विख्यात धार्मिक शास्त्रार्थ का अवलम्बन कर लिखा गया है, जो 1124 ई० में श्वेताम्बर मुनि देवसूरि और दिगम्बरसूरि और दिगम्बर मुनि कुमुदचन्द्र के बीच हुआ था। इसमें कुमुदचन्द्र का मुखमुद्रण हो गया। इसलिए इस रूपक का सार्थक नाम है।"** (संस्कृत साहित्य का इतिहास, पृ० 583, वाराणसी, 97)

कृष्णचैतन्यः एतस्मिन् विषये प्रतिपादयति-**"इसीलिए यशश्चन्द्र ने एक नाटक की रचना की जो दो परस्पर विरोधी जैनमतों के संस्थापकों, श्वेताम्बर सूरि तथा दिगम्बर कुमुदचन्द्र के बीच विवाद के विवरण के अतिरिक्त और कुछ नहीं है।"** (संस्कृत साहित्य का नवीन इतिहास, पृ० 385, वाराणसी, 1965)। संस्कृतवाङ्मयकोशे श्रीधर भास्कर वर्णेकरमहोदयः यशश्चन्द्रस्य नाम्ना कुसुमचन्द्रनाटकस्याप्युल्लेखं करोति।

गुर्जरप्रदेशस्य काव्यकारेष्वनेके सन्ति, परं भट्टिमाघयोर्नाम विशेषतयोल्लेख्यमस्ति। द्वयोर्मध्ये एकमपूर्वं साम्यमस्ति यद्द्वयोः काव्ययोर्नाम वधपदेन युक्तमस्ति। भट्टेः रचना अस्ति- रावणवधमहाकाव्यं माघस्य चास्ति शिशुपालवधमहाकाव्यम्। द्वयोर्मध्ये एकमद्भुतं साम्यमिदमस्ति यद्द्वयोः काव्ययोः नाम सामाजिकेषु प्रसिद्धं नास्त्यपितु द्वयोः रचनाकारयोर्नाम्ना काव्ययोः प्रसिद्धिरस्ति। महाकविः भट्टिः स्वयमेव प्रतिपादयति यत्सः वलभ्यां राज्ञः श्रीधरसेनस्य समये आसीत्-

**काव्यमिदं विहितं मया वलभ्यां श्रीधरसेननरेन्द्रपालितायाम्।**
**कीर्तिरतो भवतान्नृपस्य तस्य क्षेमकरः क्षितिपो यतः प्रजानाम्।।** (22.35)

महाकवेः माघस्य जन्म गुजरातप्रान्तस्य भीनमालनगरे जातमासीदिति शिशुपालवधस्य पाण्डुलिपिषु प्राप्यते-"इति श्रीभिन्नमालवास्तव्यदत्तक-सूनोर्महावैयाकरणस्य माघस्य कृतौ शिशुपालवधे महाकाव्ये...."इति। भीनमालनगरं विद्याकेन्द्रातिरिक्तं विभवसम्पन्नमप्यासीदिति ह्वेनसांगोप्युल्लिलेख। समासतो वक्तुं शक्यते यत्प्राच्यविद्यादृष्ट्यागुजरातप्रदेशः अतीवोर्वरः अस्ति। एतस्मिन् विषये राष्ट्रपतिसम्मानितस्य गौतमपटेलमहोदयस्य सम्पादकत्वे **"Contribution of Gujarat to Sanskrit Literature"** इति ग्रन्थेन विस्तरेण ज्ञातुं शक्यते।

मान्याः प्राच्यविद्याव्रतिनः,

एतादृशस्य गुजरातप्रदेशस्य धार्मिकस्थले सोमनाथे सम्मेलनमिदं वैशिष्ट्यमावहति। स्वयमहं शान्तिनिकेतने यत्त्रिंशं सम्मेलनं जातमासीत्ततः निरन्तरं भागग्रहणं करोमि। मत्कृते उल्लेख्योस्ति यत्तत्सम्मेलनस्य 'प्रोसिडिंग्स' इत्यत्र मम शोधपत्रं प्रकाशितमभवत्। पुनश्च गुजराते यद्वात्रिंशं सम्मेलनमभवत् ततः निरन्तरमहं कार्यकारिण्यामस्मि। इत्थं दशकचतुष्टयं यावत् अनवरतमहं प्राच्यविद्यासम्मेलनेन संयुक्तो भूत्वा तस्य सेवायां निरतोऽस्मि।

सोमनाथविषये सर्वे जनाः जानन्तीति मत्वा तद्विषये केवलमुद्धरणद्वयं दातुमीहे। क्षेत्रमिदं प्रभासक्षेत्रं कथ्यतेऽति स्कन्दपुराणे प्रतिपादितमस्ति तत्रोक्तमस्ति यत्क्षेत्रमिदं सरस्वत्याः तटे विराजते यत्र लवणोदधिना तस्याः सङ्गमो जायते-

**"एवं सरस्वती प्राप्ता प्रभासं क्षेत्रमुत्तमम्।**
**ब्रह्मलोकान्महादेवि सर्वपापप्रणाशिनी।।**
**सोमेशाद्दक्षिणाग्नेये सागरस्य समीपतः।**
**संस्थिता तु महादेवी वडवानलधारिणी।।** (34.31.3-4)

सरस्वत्याः एषा धारा प्रतीचीधारा मन्यते। प्रभासक्षेत्रं वराहपुराणे सौकरवक्षेत्रमिति कथितमस्ति यत्र चन्द्रः शापमुक्त्यर्थं दशसहस्रवर्षाणि तपस्तेपे-

**तत्र सौकरवे तीर्थे चन्द्रो विष्णुमतोषयत्।**
**प्राप्ता च परमा सिद्धिः सोमतीर्थेऽन्यदुर्लभा।।**
**यत्र तप्तं तपस्तेन सोमेन सुमहात्मना।**
**पञ्चवर्षसहस्राणि एकपादेन तिष्ठता।।**
**पञ्चवर्षसहस्राणि तथैवोर्ध्वमुखः स्थितः।**
**एवमुग्रं तपः कृत्वा कान्तिमानभवच्च सः।।** (अ० 37)

चन्द्रेणाथवा सोमेनात्र तपस्तप्तमत एव स्थानमिदं सोमनाथमिति मन्यते, परमत्राहमेकमन्यत् तथ्यं स्थापयितुमिच्छामि। नाहं जाने यदेतस्मिन्विषये केनापि विदुषा पूर्वमुक्तमस्ति न वा?

'सोम' इति पदस्य एका व्युत्पत्तिर्जायते **'उमया सह सोम'** इति, अर्थात् यत्र पार्वत्या सह शिवस्योल्लेखो जायते स भवति सोम इति। एषा व्युत्पत्तिः प्रबोधचन्द्रोदयनाटकस्य चन्द्रिकाटीकायां दत्तास्ति। तत्रोक्तमस्ति- **"उमया सहितः सोमः, सोमो यथा पार्वत्या सह कैलासे मोदते तद्वद्भक्तः पार्वतीतुल्यकान्तया सहितः सन् ईश्वरवेषधारी कैलासे मोदते, सैव मुक्तिः।"** (पृ० 111, निर्णयसागरप्रेस, 1924)। अनया व्युत्पत्त्या सोमनाथस्य व्युत्पत्तिः भविष्यति-**"सोम एव नाथः यस्य स्थानस्य तत् स्थानं सोमनाथमिति।"**

वस्तुतः शिवस्य कृते सोम इति पदं प्रसिद्धमेवास्ति। प्रबोधचन्द्रोदयादिनाटकेषु सोमसिद्धान्तस्योल्लेखः प्राप्यते। प्रबोधचन्द्रोदयस्यैकस्मिन् वाक्ये उक्तमस्ति-**"ततः प्रविशति कापालिकरूपधारी सोमसिद्धान्तः"**। (पृ० 111, चौखम्बा, 1968)।

शैवसम्प्रदायस्यानेके सम्प्रदायाः यद्यपि समग्रे भारते प्राप्यन्ते, परं यामुनाचार्येण स्वीये आगमप्रामाण्ये सम्प्रदायस्यास्य चतुर्विधत्वं स्थापितमस्ति- शैवः, पाशुपतः, कालामुखः, कापालिकश्च-

**यथा माहेश्वरे तन्त्रे विरुद्धं बहु जल्पितम्।**
**चतुर्विधा हि तत्सिद्धचर्यामार्गानुसारिणः।।**
**यथा कापालिकाः कालामुखाः पाशुपतास्तथा।**
**शैवास्तत्र च कापालं मतमेतं प्रचक्षते।।** (पृ० 46, तारायन्त्रालयः, वाराणसी, 1937)

सोमसिद्धान्त एव परमेश्वरसिद्धान्तः, भैरवसिद्धान्तः, कौलाचारः, सरभंगसम्प्रदायः, अघोरमतं वा वक्तुं शक्यते। सोमसिद्धान्तः वामाचारसिद्धान्तोऽस्ति, यतः पूर्वं वेदाचारः, वैष्णवाचारः, शैवाचारः, दक्षिणाचारः, सिद्धान्ताचारश्च ज्ञायते। वामाचारिणस्तु घोषयन्ति यत्तेषां सम्बन्धः अथर्ववेदेन वर्तते। सोमसिद्धान्तस्य साधना कौलाचारनाम्ना बोध्यते। आचार्यो हजारीप्रसाद द्विवेदी सौभाग्यभास्करमतमुद्धरन् कुलाकुलयोः पार्थक्यं स्पष्टीकरोति-

**कुलं शक्तिरिति प्रोक्तमकुलं शिव उच्यते।**
**कुलेऽकुलेस्य सम्बन्धः कौलमित्यभिधीयते।।** (नाथसम्प्रदाय, पृ०61)

अनेनोद्धरणेन ज्ञायते यत्कुलं शक्तिः, उमा, पार्वती वास्ति अकुलञ्च शिवः, तयोः समन्वयः कौलमिति। प्रबोधचन्द्रोदयस्य कापालिकोऽपि कुलाचार्योभिहितोऽस्ति। कुलस्य व्याख्यां कुर्वता भास्कररायेणोक्तमस्ति- **"कुः पृथिवीतत्त्वं लीयते यस्मिन् तदाधारचक्रं कुलम्।"** (भारतीय दर्शन-बलदेव उपाध्याय, पृ०638, काशी, 1966)। कुलशब्दस्यार्थः त्रिकोणः योनिर्वा स्वीक्रियते। अत एव सिद्धान्तोऽयं भोगवादी मन्यते। कुलस्यापरोऽर्थः भवति कुण्डलिनी। यदा साधकस्य कुण्डलिनी जागरिता भवति तदा सा शिवोन्मुखा जायते। कौलसम्प्रदायः पञ्चमकाराणां सेवनं मनुते-मद्यम्, मांसम्, मत्स्यम्, मुद्रा, मैथुनञ्च। कापालिकाः पञ्चमकाराणामभिप्रायं भिन्नतया प्रतिपादयन्ति। तत्र ब्रह्मरन्ध्रेणोत्पन्नममृतं मद्यमस्ति, पापपुण्यवतां पशूनां ज्ञानखड्गेन हननमेव मांसभक्षणमस्ति, देहे इडापिङ्गलयोर्मध्ये श्वासप्रश्वासयोर्नाम मत्स्यमस्ति, असज्जनानां त्याग एव मुद्रा भवति तथा सहस्रारे स्थितस्य शिवकुण्डलिन्योः मिलनमेवाथवा सुषुम्नाप्राणयोस्सङ्गम एव मैथुनं कथ्यते। कापालिकाः परद्रव्येषु अन्धवत्, परस्त्रीषु नपुंसकवत्, परापवादे मूकाः, जितेन्द्रियाश्च कथिताः सन्ति-

**परद्रव्येषु योऽन्धस्य परस्त्रीषु नपुंसकः।**
**परापवादे यो मूकः सर्वदा विजितेन्द्रियः।।**
**तस्यैव ब्राह्मणस्यात्र वामे स्यादाधिकारिता।** (भारतीय दर्शन-पृ० 640)

भावचूडामणितन्त्रेऽप्युक्तमस्ति यः कर्दमचन्दनयोर्मध्ये, शत्रुप्रिययोर्मध्ये, श्मशानभवनयोर्मध्ये, काञ्चनतृणयोर्मध्ये च भेदं न करोति स एव वास्तविकः कौलः-

**कर्दमे चन्दनेऽभिन्नं पुत्रे शत्रौ तथा प्रिये।**
**श्मशाने भवने देवि तथैव काञ्चने तृणे।।**
**न भेदो यस्य देवेशि स कौलः परिकीर्तितः।।** (भारतीय दर्शन- पृ० 637)

परमुपर्युक्तस्य कौलमतस्य विवरणं नाधिकतया शास्त्रेषु काव्येषु वा प्राप्यते, अपितु तेषां भोगवादस्यैव चर्चा प्राप्यते। सोमसिद्धान्तस्य विस्तृतं वर्णनं प्रबोधचन्द्रोदये दृश्यते यत्र कापालिकः स्वमतविषये निर्दिशति यन्मस्तिष्कांत्रवसाभिः युक्तेन महामांसेन सुरापानेन च तेषां पारणा भवति तेनैव महामांसेन च ते जुह्वति महाभैरवञ्च पूजयन्ति-

**मस्तिष्कांत्रवसाभिपूरितमहामांसाहुतीर्जुह्वतां**
**वह्नौ ब्रह्मकपालकल्पितसुरापानेन नः पारणा।**
**सद्यः कृत्तकठोरकण्ठविगलत्कीलालधारोज्ज्वलै-**
**रर्च्यो नः पुरुषोपहारबलिभिर्देवो महाभैरवः।।** (3.13)

कापालिको व्यनक्ति यन्महेश्वरः प्रतिपादयति यत्पार्वतीप्रतिरूपया प्रियतमया सहालिङ्गितो भूत्वैव जीवः शिवस्वरूपतामाप्नोति-

**पार्वत्याः प्रतिरूपया दयितया सानन्दमालिङ्गितो**
**मुक्तः क्रीडति चन्द्रचूडवपुरित्यूचे मृडानीपतिः।।** (3.16)

प्रबोधचन्द्रोदयस्यैव श्लोकमेकम् (3.20) उद्धरयता डा० सीताकृष्ण नाम्बियारः लिखति यद्दक्षिणभारते सम्प्रत्यपि एतादृशः एकः सम्प्रदायः प्राप्यते यः 'कडु कडु पाण्डिस' इति कथ्यते-

**"Even today there is in South India a sect of people called 'Kaḍu kaḍu pāṇḍis', who with ḍamaru in their hands beg door to door and are believed to practice the primitive siddhis mentioned above."**

*(Introduction of Prabodhchandrodaya, p 51, Motilal, 1971)*

पुडुचेरितः प्रकाशिते न्यू इण्डियन एक्सप्रेस इत्यस्य चत्वार्यधिकविंशशतकस्य अगस्तमासस्य सप्तमदिवसस्याङ्के कार्तिकमाधवनस्यैकः आलेखः प्रकशितोऽस्ति यत्र तेन विस्तरेण सम्प्रदायस्यास्य विवरणं दत्तमस्ति। तेन प्रतिपादितमस्ति यद्ये कडु कडु पाण्डिस उच्यन्ते ते वस्तुतः 'कनिक्कर'जनजातीयाः सन्ति। तेषामेका वसतिः काञ्चीपुरम्- वेल्लोरमार्गे सिरुकवेरीपक्कम् ग्रामे विद्यते यत्र प्रायः किञ्चिद्वर्षपूर्वपर्यन्तं चतुस्त्रिंशत् परिवाराः निवसन्ति स्म। कनिक्करजनजातीयेषु एकेन कवडीनाम्ना जनेन सः तेषां जीवनशैलीं ज्ञातवान्। एते जनानां पीडानिवारणं कुर्वन्ति। ते हस्तरेखाविशेषज्ञाः ज्योतिर्विदश्च भवन्ति। ते जक्कम्मादेव्याः पूजकाः भवन्ति। तेषां विवाहः तेषामुपसम्प्रदायेष्वेव भवति। ते सन्ति सप्त-चवन-वकड-बंगोध-धरकर-वस्तर-मुश्चिकर-सासनाश्च।

विद्यापरिणयनाटकस्य सोमसिद्धान्ती पञ्चमकाराणामुपयोगितां प्रमाणयति (4.28, आनन्दराय मखी, चौखम्बा, 1967)। सः सांसारिकाणां विषयाणां प्राप्तिमेव मोक्षं स्वीकरोति प्रतिपादयति च यत्सदेहकैवल्यमेव तन्मते परमः पुरुषार्थोऽस्ति कामोपभोगश्च स्वर्गप्राप्तिरस्ति-**"सदेहकैवल्यमिदमेव नः परमपुरुषार्थ इति। स्वर्गस्त्वयमेव, यदत्र समभिलषितसर्वार्थसिद्धिभिरनियन्त्रिताः कामोपभोगा इति"।** (पृ० 81-82) गोकुलनाथोपाध्यायस्य अमृतोदयनाटके कथा चार्वाकसदृशमेव सोमसिद्धान्तं मनुते-**"तं किल चार्वाकस्य बन्धुरतिनृशंसः सोमसिद्धान्तः समारायाह्वयते"।** (पृ० 100, चौखम्बा, 1964)।

श्रीनिवासदीक्षितस्य भावनापुरुषोत्तमनाटके कापालिकः गोरखनाथस्य नाम जपन् रंगमंचोपरि आगच्छति कथयति च यत् मत्तायाःचन्द्रमुख्याः गण्डूषयुक्तेन मदिरायाः पानेन सरसमांसभक्षणेन च देहिनः मोक्षं प्राप्नुवन्ति-

**पातव्यं मधु मत्तचन्द्रवदनागण्डूषितं सर्वदा।**
**कर्तव्या सरसामिषाशनकला यस्मिन् मते देहिनाम्।।**

(आधुनिक संस्कृतनाटक, पृ०74, रामजी उपाध्याय, संस्कृतपरिषद्, सागर वि०वि०, 1977)

राजशेखरस्य कर्पूरमञ्जर्याः भैरवानन्दोऽपि कापालिक एवास्ति, यः **"कौलो धर्मः कस्य नो भाति रम्यः"** (1.23, चौखम्बा, 1970) इत्युद्घोषयन् कथयति यद्विष्णुब्रह्मादयो देवाः ध्यानवेदपाठयज्ञादिभिश्च मुक्तिं स्वीकुर्वन्ति, परमेकः उमापतिरेव सुरतेन सुरापानेन च मुक्तिं प्रतिपादयति-

**मुक्तिं भणन्ति हरिब्रह्ममुखादिदेवा**
**ध्यानेन वेदपाठेन क्रतुक्रियाभिः।**
**एकेन केवलमुमादयितेन दृष्टो**
**मोक्षः समं सुरतकेलिसुरारसैः सः।।** (1.24)

प्राप्तेषु प्रहसनेषु प्रायः प्राथम्येनोल्लेख्यः मत्तविलासोऽपि कापालिकसिद्धान्तमित्थमेव द्योतयति यत्रैकः कापालिकः आगत्य कथयति-

**पेया सुरा प्रियतमामुखमीक्षितव्यं**
**ग्राह्यः स्वभावललितोऽनिकृतश्च वेषः।**

**येनेदमीदृशमदृश्यत मोक्षवर्त्म**

**दीर्घायुरस्तु भगवान् स पिनाकपाणिः।।** (संस्कृतनाटक-ए०बी० कीथ, पृ०187, मोतीलाल, 1971)

इत्थं सोमसिद्धान्ते कापालिकसिद्धान्ते वा उमया सह शिवस्य चर्चा विद्यते। सिद्धान्तोऽयं मनुते यत्पार्वतीतुल्यप्रियायाः साहचर्येणैव कोऽपि मुक्तिं प्राप्स्यति।

उपस्थिताः विद्वांसः विदुष्यश्च,

समासतः उपस्थापयितुं शक्यते यद्भगवतः सोमनाथस्य मन्दिरम् उमया सह शिवं द्योतयति। यद्यपि प्रमुखानां देवानां चित्रणेऽस्माकं संस्कृतिः तेषां दयितानामप्युल्लेखं करोति, परमिदमपि तथ्यमेवास्ति यत्केवलं देवाधिदेवः शिव एव अर्धनारीश्वररूपेण चित्रितोऽस्ति।

अस्माकं श्रुतिग्रन्थेष्वप्यर्धनारीश्वरस्य कल्पना विराजते। बृहदारण्यकोपनिषदि उक्तमस्ति-**"सोऽकामयत द्वितीयो म आत्मा जायेति"** (1.2.4)। एष एव विषयः अग्रे विस्तरेण प्रतिपादितोऽस्ति यत्स एव स्त्रीपुरुषौ यथा आलिङ्गितौ भवतः तथैवाभवत्। तदा तेन स्वदेहं विभक्तं, तस्यार्धभागेन पतिः जातः अवशिष्टेनार्धभागेन च पत्नी जाता। अत एव शरीरमिदमर्धबृगलवदभवत्। एष एवार्धबृगलवद् विद्यमानः पुरुषार्धः स्त्रीरूपेणार्धबृगलेन यदा संयुक्तो जायते तदा पूर्णतामेति। अनेन सृष्टिः जाता-**"स द्वितीयमैच्छत्। स हैतावानास यथा स्त्रीपुमांसौ सम्परिष्वक्तौ स इममेवात्मानं द्वेधापातयत्ततः पतिश्च पत्नी चाभवतां तस्मादिदमर्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यस्तस्मादयमाकाशः स्त्रिया पूर्यत एव तां समभवत्ततो मनुष्या अजायन्त"** (1.4.3)। शङ्कराचार्यः प्रत्यपीपदत्र यद्यतो हि पुरुषार्ध आकाशः स्त्र्यर्धेन शून्योभवत्यत एव विवाहेन स पूर्णो जायते यथा विदलार्धद्वयं सम्पुटिते सति पूर्णं जायते-**"यस्मादयं पुरुषार्ध आकाशः स्त्र्यर्धशून्यः पुनरुद्वहनात्तस्मात्पूर्यते स्त्र्यर्धेन, पुनः सम्पुटीकरणेनेव विदलार्धः।"**(1.4.3 इत्यत्र शाङ्करभाष्यम्)। शतपथब्राह्मणेऽपि प्रतिपादितमस्ति यत्कोपि मनुष्यः पत्नीं प्राप्यैव पूर्णो जायते- **"यावज्जायां न विन्दते असर्वो हि तावद् भवति।"** (5.2.1.10) **"तदैक्षत बहुस्यां प्रजायेय"** इति रूपेण छान्दोग्योपनिषदि (6.2.3) अपि, पुनश्च **"सोऽकामयत। बहुस्यां प्रजायेयेति"** रूपेण तत्तैरीयोपनिषदि (2.6) अपि समाम्नायते।

स्मृतिग्रन्थाः श्रुतिग्रन्थानामनुगमनं कुर्वन्तीति महाकविना कालिदासेनोक्तमस्ति। तदनुरूपं मनुस्मृतावपि अर्धनारीश्वरस्योल्लेखो दृश्यते-

**द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत्।**

**अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः।।** (1.32)

बृहदारण्यकोपनिषदि सः परमपुरुषः काममयः कथितोऽस्ति-**"काममयः पुरुषः स एव"** (3.9.11)। अंशोपरि भाष्यं कुर्वता शङ्कराचार्यो मीमांसते यत् स्त्रीप्रसङ्गस्याभिलाषा एव कामतत्त्वमस्ति, स्त्रीतः कामस्योद्दीपनं जायते- **"स्त्रीव्यतिकराभिलाषः कामः, कामशरीर इत्यर्थः.................... स्त्रीतो हि कामस्य दीप्तिर्जायते"**(3.9.11 इत्यत्र शाङ्करभाष्यम्)। अत्र शङ्कराचार्येण **'स्त्रीव्यतिकराभिलाषः कामः'** इति कामतत्त्वं परिभाषितमस्ति। अर्धनारीश्वरं स्वीकुर्वता महाकविना कालिदासेन मालविकाग्निमित्रनाटके व्यलेखि-**"रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा"** (1.4)। यूनानस्य दन्तकथानकेष्वपि प्राप्यते यत्पूर्वं स्त्रीपुमांसौ भिन्नौ नैव आस्ताम्। ईश्वरेण द्विधा विभक्तम् अत एव तौ परस्परमाकर्षितौ भूत्वा सदा एकाकारतामिच्छतः। बाईबिलग्रन्थेऽपि एतादृशः भावो दृश्यते यं विवेचयता विद्यामार्तण्डः सत्यव्रत विद्यालङ्कारो लिखति-**"इस भाव को बाईबिल (Genesis 1.27 प्रकरण) में लगभग इसी प्रकार कहा गया है। वहाँ लिखा है- "In the image of God created He him; Male and Female created He them". इसके आगे 22वीं आयत में लिखा है-'And the rib, the Lord God had taken from man, made He a woman'- पुरुष की पसली निकालकर परमात्मा ने उसे स्त्री बना दिया। इसका यही अभिप्राय है कि सृष्टिरचना से पूर्व पुरुष इतना था जितने स्त्री-पुरुष मिले हुए थे"-** यही बात इस उपनिषद् में कही गई है। (उपनिषद् प्रकाश, पृ० 441, विजयकृष्ण लखनपाल, नई दिल्ली-2, 1981)। प्रश्नोपनिषदि अपि

वर्णितमस्ति यत्स्वयं प्रजापतिः मिथुनमुदपादयत् येन तौ प्रजाः उत्पादयिष्यतः- **"स तपस्तस्वा मिथुनमुत्पादयते। रयिं च प्राणं चेत्येतौ मे बहुधा प्रजाः करिष्यन्ति इति।"**(1.4)। बृहदारण्यकोपनिषदि उल्लिखितमस्ति-**"रेतो वै प्रजापतिः।"** (3.9.22)। अत्र भाष्यं विदधता शङ्कराचार्येण प्रश्नोत्तरशैल्यामुक्तमस्ति, यद्वीर्यं कुत्र विराजते? सः उत्तरं ददाति-हृदय इति। हृदयस्य कार्यं वीर्यं भवति, अत एव हृदयत एव रेतसः स्खलनं जायते-**"कस्मिन्नु रेतः प्रतिष्ठितमिति? हृदय इति-यस्माद् हृदयस्य कार्यं रेतः। कामो हृदयस्य वृत्तिः, कामिनो हि हृदयाद्रेतोऽधिस्कन्दति।"** (3.9.22 इत्यत्र शाङ्करभाष्यम्)। अत्र ध्यातव्यमस्ति यत्पाश्चात्यजगति तत्त्वमिदं शारीरिकी क्षुधा चित्रितास्ति परमस्माकं कामशास्त्रमिदं मनसस्तुष्टिं द्योतयति।

मान्याः प्रतिनिधयः,

शास्त्राणां प्रामाण्येन एषा स्थापना बलवती जायते यत्सोमनाथस्य देवेश्वरः शिवः अर्धनारीश्वरस्य कल्पनां प्रबलीकरोति।

प्राच्यविद्यासम्मेलनस्य प्रभागेषु वैदिकप्रभागः सर्वोपरि विराजते। वस्तुतः प्राच्यविद्यायाः कृते मूर्ध्नि विराजन्ते अस्माकं वेदाः वैदिकञ्च साहित्यम्। तत्र ऋततत्त्वस्य या कल्पना विराजते सा तु प्रेरणास्पदा। लैटिनभाषायामिदं तत्त्वं 'रेक्टस' रूपेण बोध्यते, येनांग्लभाषायाः **'राइट'** शब्दः आगतोऽस्ति। ऋततत्त्वं शाश्वतं चिन्तनं धर्मं वा द्योतयति, यन्नास्ति परिवर्तनीयम्। अस्यैव शाश्वतनियमस्य पालनेन मानवोऽपि देवत्वं प्राप्नोति। शाश्वताः नैतिकाः नियमाः एव धर्मसंज्ञकाः सन्ति, तदनुसारमाचरणञ्च कर्म इति। अत एव यजुर्वेदस्य ऋषिणा प्रोक्तमस्ति- **"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।"** इति

यजुर्वेदः **"त्रीणि ज्योतींषि"** (8.38) इति रूपेण आदित्याग्निवायुतत्त्वानि प्रकाशत्रयं स्वीकरोति येन जगदिदं विराजते। सवितृतत्त्वमन्तरिक्षे ऊर्जारूपेण द्योतते। तदेव तत्त्वं यदास्माकं शरीरं प्राप्नोति तदा तद्गायत्रीरूपेण जायते।

महामहोपाध्यायः गिरिधरशर्माचतुर्वेदः वेदस्य प्रतीकानामन्वेषणं विदधाति। सः **'गो'** इति शब्दस्य प्रतीकात्मकताविषये व्यनक्ति यच्छब्दोऽयं मातृत्वं द्योतयति। मातृरूपा प्रकृतिः अदितिर्वा **'गो'** भूमिरपि **'गो'** तथैव वाण्यपि 'गो' इत्यभिधेया। सः प्रतिपादयति यद्यदा पुरुषेण प्रकृतिः संयुज्यते तदा सा गर्भवती जायते, सूर्येण सह संयुक्ते जाते पृथिवी गर्भं बिभर्ति, तथैव यदा मनसा वाणी संयुक्ता जायते तदा गर्भयुक्ता भवति। अत एव एताः **'गो'** इति पदवाच्याः सन्ति। इत्थमेव सः प्रतिपादयति यत्परमेष्ठीनामधेयः **'नार'** इति आन्तरिक्षं जलमस्ति। **"अप्रकेतं सलिलं सर्वमा इदम्"** (ऋ० 10/129/3) तथा **"अम्भः किमासीद्गहनं गभीरम्"** (ऋग्वेद-10/129/1) इति रूपेण नासदीयसूक्ते तस्यैव चित्रणमस्ति। **"आपो ह यद् बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्।"** (ऋ०10/121/7) इति रूपेण तदेव जलं गर्भधारणं कृत्वा अग्निं सूर्यं वा उत्पादयामास। अग्निशब्दः सूर्यस्य वाचकोऽस्ति। एतस्मिन् विषये महर्षिणा यास्केनापि निरुक्ते उक्तमस्ति-**"अपि एते उत्तरे ज्योतिषी 'अग्नी' उच्येते"।** (7/4)

ऋग्वेदस्यैवोपर्युक्ते सूक्ते ऋषिणोक्तमस्ति-**"नासदासीन्नो सदासीत्तदानीम्"** (10/129/1)। सृष्टेः आरम्भे नैव सदासीत् नैवासदासीत्तर्हि किमासीदिति जिज्ञासायां शतपथब्राह्मणे प्रतिपादितमस्ति यत्तर्हि केवलं मन एव आसीत्-**"आसीदिव वा इदमग्रे नैवासीत्तद्ध तन्मन एवास"।** (10/5/3/1)।

तैत्तिरीयसंहितायां (3.12.3.3) विवेचितमस्ति यत् मनसः वशे एव सर्वं भवति-**"मनसो वशे सर्वमिदं बभूव"।** तस्यां संहितायामेवान्यत्र विश्लेषितमस्ति यन्मनसा एव वयं किञ्चिदपि सर्वमपि च प्राप्तुं शक्नुमः-**"मनसा ह्यनाप्तमाप्तये"** (2.5.11.4)। वस्तुतः शास्त्रेषु मनस्तत्त्वं प्रतीकरूपेण चित्रितमस्ति, यस्य चत्वारि रूपाणि वयं प्राप्नुमः। शतपथब्राह्मणे यन्मनः सृष्टेः आरम्भे उक्तमस्ति तत्तु प्रथमप्रकारेण वक्तुं शक्यते। द्वितीयं तु वैशेषिकमतानुसारेण संकल्पविकल्पात्मकं यद्भवति तदेव इन्द्रियरूपमस्ति। यदा मनः अन्येषामिन्द्रियाणां नियन्त्रणं विदधाति तदा तस्य तृतीयं रूपं जायते। इत्थमेव यदा सत्त्वं मनः भवति तदा तत् कार्यं करोति, येन वयं श्वसिमः, अस्माकं शरीरे रक्तसञ्चरणञ्च जायते। मनोबुद्ध्योर्मध्ये मनः वाञ्छति, बुद्धिः

जानाति। ज्ञानं वाञ्छां प्रशमयति। मनः चन्द्रमसा साम्यं बिभर्ति बुद्धिश्च सूर्येण। अत एव बुद्धिः स्वयं प्रकाशयति, परं मनसः प्रकाशिका भवति बुद्धिः। विषयाः स्वयमेव मनसः पार्श्वे आगच्छन्ति, परं बुद्धिस्तु स्वनिर्णयानुसारं विषयं चिनोति। अतः विषयाणां चयने मनः स्वतन्त्रं नास्ति, परं बुद्धिस्तु स्वतन्त्रा। मनः संस्कारं जनयति, बुद्धिस्तु ज्ञानमुत्पादयति।

अस्तु वैदिकसाहित्येषु ये विचाराः साक्षात्प्रतीकरूपेण वा सन्ति, तेषामन्वेषणमस्माकं दायित्वमस्ति। एकमन्यद्विश्लेषणम्। अस्माकं देशस्य नाम भारतम् इति। अस्य नामकरणविषये विचारयन्ति पुराणानि प्रतिपादयन्ति यद् ऋषभदेवस्य पुत्रेण नाम्ना अथवा दुष्यन्तस्य पुत्रेण नाम्ना भारतमिति नामकरणं जातं, परं कौषीतकिब्राह्मणानुसारं अग्निः एवात्र भरतः, यतो हि सः भरणं करोति-**“अग्निर्वै भरतः। स वै देवेभ्यः हव्यं भरति”।** (3.2)। शतपथब्राह्मणेऽपि निगदितमस्ति-**“एष उ वा इमाः प्रजाः प्राणो भूत्वा बिभर्ति तस्मादेवाह भारतेति”** (4.2.2)। प्रतीयते यदृषभदुष्यन्तौ स्वपुत्रयोः नामकरणमग्निं ध्यात्वैव कृतवन्तौ, तयोः नाम्ना भारतं स्यात्।

मान्याः प्रतिनिधयः,

वेदातिरिक्तं प्राच्यविद्यासम्मेलनस्यास्य सर्वेपि प्रभागाः महत्त्वपूर्णाःसन्ति, यतो हि ते भारतस्य प्राच्यविद्यानां प्रातिनिध्यं कुर्वन्ति। सम्मेलनस्य प्राक्तनैः संरक्षकैः अभिव्यक्तमस्ति यत्सम्मेलनमिदं प्राच्यविदुषामेतादृशं सङ्घटनमस्ति यत्प्रामुख्येन भारतीयायाः प्राचीनार्वाचीनायाश्च प्राच्यविद्यायाः विविधक्षेत्राणां शोधकार्येषु सामञ्जस्यं स्थापयति-**“The All India Oriental Conference is an organisation of Oriental Scholars founded with the principal aim of co-ordinating research work in the various branches of Oriental Learning, particularly those pertaining to Indianistic Studies, traditional and modern.” (15th AIOC, Bombay, 1949).**

यद्यपि सम्मेलनदृष्ट्या प्राचीनाः अर्वाचीनाश्च भारतीयतायाः संवाहिकाः सर्वाः विद्याः अस्माकमध्ययनक्षेत्रे विराजन्ते, परं निश्चयेनास्माकं शास्त्राणां परिरक्षणं कथं स्यादिति सर्वैः सम्भूय चिन्तनीयम्। ये विद्वांसः कार्येऽस्मिन् संलग्नाः सन्ति तानहं सश्रद्धं नमस्करोमि। ज्ञानवृद्धौ सम्मेलनस्यास्य महत् योगदानं वर्तते। देवाधिदेवस्य नगर्यां सोमनाथे अनुष्ठितमधिवेशनमिदं प्राच्यविद्यानां समुन्नयनार्थं नवीनानां सूत्राणामुद्भावनां कृत्वा प्राच्यविद्याचर्चायाः क्षेत्रं समुज्ज्वलं विधास्यतीत्यत्र नास्ति सन्देहावसरः।

**“नः सर्व इज्जनः संगत्यां सुमना असत्” ऋ० 10/141/4**
**(All our associates may be like minded in our work.)**

इति शम्

# 49TH SESSION OF ALL INDIA ORIENTAL CONFERENCE

**Welcome Committee Chairman**

**Shri Bhupendrasinh Chudasama ji**
Hon. Minister of Education, Government of Gujarat

Patron

**Prof. Ark Nath Chaudhary**
Vice-Chancellor,
Shree Somnath Sanskrit University, Veraval

**Advisory Committee**

**Shri Rameshbhai Ojha**
Sandipani Vidyaniketan

**Padmashri Dahyabhai Shastri**
Brahmarshi Sanskar Dham

**Shri P. K. Laheri**
Secretary, Somnath Trust

**Sadhu Madhavpriyadas Swami**
SGVP, Chharodi

**Dr. Pankaj L. Jani**
Vice-Chancellor, BAOU

**Sadhu Shrutiprakashdas Swami**
Director, AARSH

**Dr. Gautambhai Patel**
President Awardee Scholar

**Dr. Bhagyesh Jha**
Former IAS

**Dr. Jay Prakash Narayan Dwivedi**
Sanskrit Scholar

**Local Working Committee**

**Prof. Ark Nath Chaudhary**
Patron

**Prof. Devendra Nath Pandeya**
Local Secretary

**Dr. Janakisharan Acharya**
Additional Local Secretary

**Members of Local Working Committee**

**Prof. Mahedrakumar A. Dave**
**Prof. Vinod Kumar Jha**
**Prof. Archana Dubey**
**Dr. Narendrakumar L. Pandya**
**Dr. Dashrath Jadav**

**Prof. Chandrakant Shukla**
General President

**Prof. Ramakant Shukla**
Vice-President

**Prof. Saroja Bhate**
General Secretary

**Dr. Girish Awasthi**
Joint Secretary

**Prof. Singh Prasoon Dutta**
Treasurer

# Sectional Presidents of 49th All India Oriental Conference

| | | |
|---|---|---|
| 1 | Vedic | Prof. Prayag Narayan Mishra, Department of Sanskrit, Lucknow University, Lucknow (U.P.) 226007 |
| 2 | Iranian | Prof. Hasan S. A., Department of Persian, Jawaharlal Nehru University, New Delhi 110 067. |
| 3 | Classical Sanskrit | Dr. Chandra Bhushan Jha, St. Stephen's College, University of Delhi, Delhi-110007 |
| 4 | Islamic Studies | Prof. Dr. Sujauddin N. Shaikh. 7/2/123, Electronic Appliances, Nana Taiwad, Opp. J. J. Auto Spare, Azad Road, Valsad - 396001. Gujarat. |
| 5 | Arabic & Persian | Dr. Allauddin Shah, Centre of Persian and Central Asian Studies, School of Languages, Literature and Culture Studies, Jawaharlal Nehru University, New Delhi – 110067 |
| 6 | Pali & Buddhism | Prof. Ratna Basu, 183, Jodhpur Park Backside Building, 1st Floor, Kolkatta 700068 |
| 7 | Prakrit & Jainism | Prof. Chaudhary Biswas Nath, Nirmal Anand Vihar, Near Vishal Mega Mart, Chandva Mode, Aara, Bihar-802312 |
| 8 | History | Prof. C. Rajendran, 28/1097, "Rajadhani", T.P. Kumaran Nair Road, Chevayur, Calicut - 17 |
| 9 | Archaeology | Dr. Vijay Pandya, Ahmedabad in place of Prof. Pradhan Shrikant, Deccan College, Post Graduate Research Institute, Yerawda, Pune-411006 |
| 10 | Indian Linguistics | Prof. Kamdev Jha, 6 D, Dayal Baug, Ambala Cantt., Harayana 133001 |
| 11 | Philosophy | Prof. Dilip Charan, Department of Philosophy, School of Psychology, Education & Philosophy, Gujarat University, Ahmedabad. |
| 12 | Religion | Prof. Mina Shukla, Head, Department of Sanskrit, Ranchi University, Ranchi, Jharkhand-834008 |
| 13 | Dravidic Studies | Prof. M. N. Joshi, Post Graduate Department (Studies in Sanskrit), Karnataka University, Dharwad-580003 |
| 14 | Tech. Sci. & Fine Arts, Skt.& Computer | Dr. Arvind Narayan Mishra, Department of Education, Uttarakhand Sanskrit University, Bahadrabad, Haridwar, Uttarakhand |
| 15 | South East Asian Studies | Prof. Hari Dutt Sharma, Department of Sanskrit, University of Allahabad, Allahabad-211 002 (U.P.) |
| 16 | West Asian Studies | Prof. Ahmed Ishtique, Centre of Persian & Central Asian Studies, School of Language, Literature and Cultural Studies, Jawaharlal Nehru University, New Delhi-110067 |
| 17 | Modern Sanskrit | Prof. Saroj Kaushal, Department of Sanskrit, Jain Narain Vyas University, Jodhpur, Rajasthan 342011 |
| 18 | Manuscriptology | Prof. Udyanath Jha, Rashtriya Sanskrit Sansthan (Deemed University), Sadashiv Campus, Puri, Odisha-752 001 |
| 19 | Epics and Puranas | Prof. Gopal Krishna Dash, Utkal University, Vani Vihar, Bhubaneshwar, Odisha-751 004 |
| 20 | Indian Aesthetics and Poetics | Prof. Joshi Natavar, F-70 Giridarshan, Income Tax Colony, Section 21-22 CBD, Belapur, Navi Mumbai-400614 |
| 21 | Gujarati Language & Literature | Dr. Raghuveer Chaudhary, A-6, "Pooraneshwar", Gulbai Tekra, Ahmedabad-380015 (Gujarat) |

## ४९वाँ अखिल भारतीय प्राच्यविद्या सम्मेलन-२०१८
## श्री सोमनाथ संस्कृत विश्वविद्यालय, वेरावल

# विभिन्न समितियाँ

| क्रम | समिति का नाम | संयोजकों के नाम |
|---|---|---|
| 1. | कार्यक्रम स्थल निर्धारित करना तथा शैक्षणिक सत्रों की व्यवस्था समिति | प्रो. डी. एन. पाण्डेय, डॉ. एन. एल. पण्ड्या<br>प्रो. विनोद कुमार झा, प्रो. अर्चना दुबे |
| 2. | रजिस्ट्रेशन समिति | श्री रवीन्द्र काले, श्री विशाल जोषी, श्री नीतेश वाजा |
| 3. | हिसाबी समिति | मुख्य हिसाबी अधिकारी, श्री भावसिंह बारड,<br>श्री जयदीप परमार |
| 4. | निवास व्यवस्था समिति (प्रतिभागियों के लिए) | डॉ. दशरथ जादव, डॉ. बी. उमा महेश्वरी<br>श्री हितेश जानी, श्री गोपाल ठकरार |
| 5. | निवास व्यवस्था समिति (अतिथियों के लिए) | डॉ. कार्तिक पण्ड्या, श्री नित्यानन्द ओझा,<br>श्री अनिरुद्ध पण्ड्या |
| 6. | भोजन व्यवस्था समिति | प्रो. विनोद कुमार झा, श्री योगेश एल. पटेल,<br>श्री अनिल जोषी, श्री महेन्द्र वाजा |
| 7. | सांस्कृतिक कार्यक्रम समिति | प्रो. अर्चना दुबे, डॉ. पंकजकुमार रावल,<br>श्रीमती श्वेता जानी |
| 8. | मीडिया व्यवस्था समिति | डॉ. कार्तिक पण्ड्या, श्री नित्यानन्द ओझा |
| 9. | शोधपत्र-सार प्रकाशन समिति | डॉ. जानकीशरण आचार्य, डॉ. कार्तिक पण्ड्या,<br>श्री अनिरुद्ध पण्ड्या |
| 10. | प्रमाण-पत्र समिति | प्रो. देवेन्द्रनाथ पाण्डेय, डॉ. जानकीशरण आचार्य |
| 11. | मण्डप-साउण्ड व्यवस्था समिति | श्री मनीष पोपट, श्री उत्सव पण्ड्या |
| 12. | यातायात समिति | डॉ. जयेश मुंगरा, श्री केतन काछेला |
| 13. | मुख्य स्टेज तथा सेशन स्थल स्टेज सजावट समिति | डॉ. डी. एम. मोकरिया, डॉ. बी. उमा महेश्वरी,<br>श्री हितेश जानी |
| 14. | उद्घाटन/समापन हेतु आवश्यक खरीद समिति | श्री कमलेश सगर |
| 15. | बुक स्टॉल/प्रदर्शिनी व्यवस्था समिति | डॉ. दीपेश कतिरा, डॉ. शत्रुघ्न पाणिग्राही |
| 16. | फोटोग्राफी/विडीयोग्राफी/Website अपडेट समिति | श्री हरेश खेर, श्री हिरेन कुबावत |
| 17. | प्रतिभागियों के लिये Kit समिति | प्रो. देवेन्द्रनाथ पाण्डेय, डॉ. जानकीशरण आचार्य |
| 18. | अनुमति हेतु पत्र-व्यवहार समिति | श्री हितेश जानी |
| 19. | परिसर सुशोभन समिति | डॉ. डी. एम. मोकरिया, डॉ. रमेशचन्द्र शुक्ल,<br>श्री करसन छात्रोडिया |
| 20. | आमन्त्रण पत्र समिति | डॉ. जानकीशरण आचार्य, डॉ. कार्तिक पण्ड्या,<br>श्री केतन काछेला |
| 21. | प्रसार-प्रचार समिति | डॉ. शत्रुघ्न पाणिग्राही, डॉ. बी. उमा महेश्वरी |
| 22. | जल व्यवस्था समिति | श्री गोपाल ठकराल, श्री हिरेन कुबावत |

# 99 YEARS OF ALL INDIA ORIENTAL CONFERENCE

| S. N. | Place | Year | Inviting Institution | General President | General Secretary | Local Secretary |
|---|---|---|---|---|---|---|
| 1 | Poona | 1919 | BORI | R.G. Bhandarkar | Dr. P.D. Gune & Prof. R.D.Karmarkar | |
| 2 | Calcutta | 1922 | Council of P.G. Teaching | Prof. Sylvain Levi | MR. W.R. Gourlay | |
| 3 | Mardas | 1924 | Madras University | Dr. Ganganath Jha | Dr. S.K. Aiyangar | |
| 4 | Allahabad | 1926 | University of Allahabad | Dr. J.J. Modi | Dr. Amarnath Jha | |
| 5 | Lahore | 1928 | Lahore University | Dr. Haraprasad Sastri | Dr. S.K. Aiyangar | Dr. Laksman Sarup |
| 6 | Patna | 1930 | Bihar & Orrisa Research Society | R.B. Hira Lal | Dr. S.K. Aiyangar | Dr. Hira Chand |
| 7 | Baroda | 1933 | Government of Baroda | K.P. Jayaswal | Dr. S.K. Aiyangar | Dr. B. Bhattacharya |
| 8 | Mysore | 1935 | Mysore University | Dr. S. Krishnaswami Aiyangar | Dr. S. K. Belvalkar | Dr. M.H Krishna |
| 9 | Trivendrum | 1937 | Government of Travancore | Dr. F. W. Thomas | Dr. S. K. Belvalkar | Shri R. V. Poduval |
| 10 | Tirupati | 1940 | T.T. Devasthanam | Pt. Madan Mohan | Dr. M.H. Krishna | Prof. K.V. Ramaswamy Aiyangar |
| 11 | Hyderabad | 1941 | Govt. of Hyderabad | Ghulam Yazadani | Dr. S.K. De | Dr. M. Nizamuddin |
| 12 | Banaras | 1943 | Banaras Hindu University | Dr. S.K. Belvalkar | Dr. S.K. De | Dr. A.S. Altekar |
| 13 | Nagpur | 1946 | Nagpur University | Dr. P.V. Kane | Prof. K.A. Nilakantha Sasrti | Dr. Hiralal Jain |
| 14 | Darbhanga | 1948 | Maharajadhiraja of Darbhanga | R. C. Mujumdar | Dr. A.S. Altekar and Dr. R.N. Dandikar | MM. Dr. Umesh Mishra |
| 15 | Bombay | 1949 | Bombay University And Asiatic Society | S.K. De | Dr. A.S. Altekar and Dr. R.N. Dandikar | Prof. H. D. Velankar and Dr. A.D. Pusalkar |
| 16 | Lucknow | 1951 | Lucknow University | K.A. Nilakanta Sastri | Dr. A.S. Altekar and Dr. R.N. Dandikar | Prof. K.A.S. Iyer And K.C. Pandeya |
| 17 | Ahmedabad | 1953 | Gujarat University and Ahmedabad Edu. Soc. | Dr. S. K. Chatterji | Dr. R. N. Dandekar and Dr. V. Raghavan | Prof. R. C. Parikh |
| 18 | Annamalainagar | 1955 | Annamalai University | Dr. S. Radhakrishnan | Dr. R. N. Dandekar and Dr. V. Raghavan | Prof. R. Ramanujachari |
| 19 | Delhi | 1957 | Delhi University | Dr. A.S. Altekar | Dr. R. N. Dandekar and Dr. V. Raghavan | Dr. N.V. Banerjee and Dr. N.N. Chaudhari |
| 20 | Bhubaneshwar | 1959 | Govt. of Orrisa & Utkal University | Dr. V. V. Mirashi | Dr. R. N. Dandekar and Dr. V. Raghavan | Shri B.V. Nath and Dr. P. Pradhan |
| 21 | Srinagar | 1961 | Govt. of Jammu & Kashmir | Dr. V. Raghavan | Dr. R. N. Dandekar and Dr. M. Rama Rao | Prof. P.N. Pushp |
| 22 | Gauhati | 1965 | Govt. of Jammu & Kashmir | V. S. Agrawal | Dr. R. N. Dandekar and P.N. Pushp | Dr. A.K. Borkakoty, Dr. M. Neog and Shri D. Gogoi |
| 23 | Aligarh | 1966 | Aligarh Muslim Unversity | Dr. A. N. Upadhyaya | Dr. R. N. Dandekar and P.N. Pushp | Dr. Suryakanta and Dr. R. S. Tripathi |
| 24 | Varanasi | 1968 | Varanaseya Sanskrit Uni. | Ach. Vishvabandhu | Dr. R. N. Dandekar and B. R. Sharma | Dr. Rai Govind Chandra |
| 25 | Calcutta | 1969 | Jadavpur University | Dr. P.L. Vaidya | Dr. R. N. Dandekar and Dr. B. R. Sharma | Prof. Rama Ranjan Mukherji |
| 26 | Ujjain | 1972 | Vikram University | Dr. D. C. Sircar | Dr. R. N. Dandekar and Prof. J. Agrawal | Prof. V. Venkatachalam |

| | | | | | | |
|---|---|---|---|---|---|---|
| 27 | Kurkshetra | 1974 | Kurukshetra University | Dr. P.V. Bapat | Dr. R. N. Dandekar and Prof. V. Venkatachalam | Prof. Gopikamohan Bhattacharya |
| 28 | Dharwar | 1976 | Karnataka University | Dr. C. Sivaramamurti | Dr. R. N. Dandekar and Prof. G. M. Bhattacharya | Prof. K. Krishnamoorthy |
| 29 | Poona | 1978 | BORI | prof. Jan Gonda | Dr. R. N. Dandekar and Prof. K. Krishnamoorthy | Dr. S. D. Joshi and Dr. M. G. Dhadphale |
| 30 | Santiniketan | 1980 | Vishvabharati University | Prof. Nihar Ranjan Ray | Dr. R. N. Dandekar and Prof. K. Krishnamoorthy | Prof. Biswa Nath Banerjee |
| 31 | Jaipur | 1982 | Rajasthan University | Prof. Gaurinath Sastri | Dr. R. N. Dandekar and Dr. K.K. Chaturvedy | R. C. Dwivedi |
| 32 | Ahmedabad | 1985 | Gujarat University | Dr. A. M. Ghatage | Dr. R. N. Dandekar | Prof. E. A. Soloman |
| 33 | Calcutta | 1986 | Asiatic Society | Dr. V.I. Subramoniam | Dr. R. N. Dandrkar | Prof. J. Chakravorty and Dr. M. Manerjee |
| 34 | Visakhapatnam | 1989 | Andhra University | Dr. R. N. Dandekar | Dr. S. D. Joshi | P. Sriramamurti |
| 35 | Haridwar | 1990 | Gurukul Kangri University | Dr. Ramaranjan Mukerjee | Dr. S. D. Joshi | Prof. Vedaprakash Shastri |
| 36 | Pune | 1993 | BORI | Prof. P. N. Kawthekar | Dr. S. D. Joshi | Dr. Saroja Bhate and Dr. M. G. Dhadphale |
| 37 | Rohtak | 1994 | M.D. University | Dr. K. Krishnamurti | Dr. S. D. Joshi | Prof. Yajanveer Dahiya |
| 38 | Calcutta | 1997 | Jadavpur University | Prof. Jaymant Mishra | Dr. S. D. Joshi | Prof. R. S. Banerjee |
| 39 | Baroda | 1998 | Oriental Institute | Dr. P. D. Agnihotri | Dr. S. D. Joshi | Prof. R. I. Nanavati |
| 40 | Chennai | 2000 | The Sanskrit Academy | Prof Vidya Nivas Mishra, (V.P.- Prof. K. K. Chaturvedi) | Prof. Saroja Bhate (J.G.S.-Prof. Chandrakant Shukla) | Dr. E.R. Rama Bai |
| 41 | Puri | 2002 | Shri Jagannath Sanskrit Vishvavidyalaya | Prof Vidya Nivas Mishra, (V.P.- Prof. K. K. Chaturvedi) | Prof. Saroja Bhate (J.G.S.-Prof. Chandrakant Shukla) | Prof. Dr. H. K. Satpathy |
| 42 | Varanasi | 2004 | Sampurnananda Sanskrit University | Prof. K.K. Chaturvedi (V.P.-Prof. Rajendra Mishra) | Dr. Saroja Bhate (G.J.S.-Dr. H.K. Satpathy) | Prof. Gangadhar Panda |
| 43 | Jammu | 2006 | University of Jammu | Prof. Rajendra Mishra (V.P.-Prof. Satish Chandra Jha) | Dr. Saroja Bhate (Prof. Gangadhar Panda) | Prof. Ramanika Jalali |
| 44 | Kurkshetra | 2008 | Kurukshetra Uni. | Prof. Satish Chandra Jha (V.P. Prof. Shukdev Sharma) | Prof. Saroja Bhate (J.G.S.-Prof. Mithilesh Kumar) | Prof. Ranvir Singh |
| 45 | Tirupati | 2010 | Rashtriya Sanskrit Vidyapeetha | | Prof. Saroja Bhate | Prof. Radhakant Thakur |
| 46 | Kashmir | 2012 | Kashmir University | | Prof. Saroja Bhate | Prof. Mrs. Tripathy |
| 47 | Gauhati | 2014 | Gauhati University | | Prof. Saroja Bhate | Prof. Nalini Devi Mishra |
| 48 | Haridwar | 2016 | Uttarakhand Sanskrit University | Prof. Mahavir Agarwal | Prof. Saroja Bhate | Mr. Girish Kumar Awasthi |
| 49 | Veraval | 2018 | Shree Somnath Sanskrit University | Prof. Chandrakant Shukla (V.P. Prof. Ramakant Shukla) | Prof. Saroja Bhate | Prof. D. N. Pandeya Dr. Janakisharan Acharya (Add. Local Secretary) |

# INDEX



| Sr.No. | Section | Abbreviations | Pages |
|---|---|---|---|
| 1. | Vedic | V | 1-39 |
| 2. | Iranian | IR | 40-42 |
| 3. | Classical Sanskrit | CS | 43-89 |
| 4. | Islamic Studies | IS | 90-103 |
| 5. | Arabic and Persian | AP | 104 |
| 6. | Pali & Buddhism | PB | 105-111 |
| 7. | Prakrit & Jainism | PJ | 112-116 |
| 8. | History | H | 117-126 |
| 9. | Archaeology | ARCH | 127-128 |
| 10. | Indian Linguistic | IL | 129-141 |
| 11. | Philosophy | PH | 142-177 |
| 12. | Religion | R | 178-199 |
| 13. | Dravidic Studies | DS | 200-202 |
| 14. | Technical Science & Fine Arts & Sanskrit & Computer | TS&FA&SC | 203-219 |
| 15. | South-East Asian Studies | SEAS | 220 |
| 16. | West-Asian Studies | WAS | 220 |
| 17. | Modern Sanskrit | MS | 221-252 |
| 18. | Manuscriptology | MSS | 253-262 |
| 19. | Epics and Puranas | EP | 263-283 |
| 20. | Indian Asthetics and Poetics | IA&P | 284-292 |
| 21 | Gujrati Language & Literature | GLL | 293 |

## SECTION-1

# VEDIC

V - 1

## वैष्णवभावान्दोलने कलिसन्तरणोपनिषदः प्रासङ्गिकत्वम्

**विजयघोषः**, गवेषकः, गौड़वङ्गविश्वविद्यालयः मालदा, पश्चिमवङ्गः

सनातनधर्मस्य गौणोपनिषत्सु कलिसन्तरणोपनिषदन्यतमा । इयञ्च कृष्णयजुर्वेदेन समं सम्बद्धा। एतदनुमीयते यत् सार्धैकशततमे ख्रीष्टाब्दे इयमुपनिषद् रचितेति । अत्र महामन्त्राख्यं मन्त्रद्वयं विद्यमानम् । इह मन्त्रद्वितये देव्याः राधाया अष्टकृत्वः नामोच्चारितम्। अस्यामुपनिषदि राम-कृष्णयोर्नाम वारचतुष्टयमुल्लिखितं वर्तते।

वैष्णवधर्मगुरोः श्रीचैतन्यदेवस्य महता प्रयत्नेन उपनिषदोऽस्याः जनप्रियत्वम्। उपनिषदो नाममाहात्म्यमेतत् – महामन्त्रोच्चारणेन नाम ज्ञानरूपसन्तरणेन कलियुगीयदुःसहप्रभावो विलयं गच्छेत् - 'भगवत आदिपुरुषनारायणस्य नामोच्चारणमात्रेण निर्धूतकलिर्भवति' (कलिसन्तरणोपनिषद् - मन्त्रः-१)। वैष्णवसम्प्रदायानुगामिनां नये, मन्त्रस्यास्योच्चारणेनैव वक्तृ-श्रोत्र्योः मुक्तिर्नाम निःश्रेयस्सिद्धिर्भवति ।

शयन-स्वपन-जागरण-कर्मसु च सर्वदैव हरेर्नामोच्चारणं विधेयम् । सम्पदि विपदि वा आराध्यो न हि कदापि विस्मरणीयः। गतिमये जीवने 'चक्रवत् परिवर्तन्ते सुखानि च दुःखानि च'। वैष्णवसमाजे अविच्छिन्नतया इयमुपनिषद् प्रतिरन्ध्रमनुस्यूता वर्तते ।

श्रुतेः परमं गोप्यं तत्त्वमस्ति, यस्यानुशीलनेन कलिसंसारतो मुक्तिं लभते मानवः – 'सर्वश्रुतिरहस्यं गोप्यं तत् शृणु येन कलिसंसारं तरिष्यसि' (कलिसन्तरणोपनिषद् - मन्त्रः-१)। विश्वब्रह्माण्डस्यादिपुरुषस्तावत् नारायणः। कथंकारं आदिपुरुषस्य नामोच्चारणं करणीयमिति पृच्छायां ब्रह्मा उत्तरयति –

"हरे राम हरे राम राम राम हरे हरे।

हरे कृष्ण हरे कृष्ण कृष्ण हरे हरे"।।

अहोरात्रम् अविच्छिन्नेन नाम्नानेन मूलाधारस्य सुप्तकुण्डलिनी ऊर्द्धमुखिनी भवति तथा च नादध्वनिः नामोच्चारिणं नयति ब्रह्मधाम्नि । एतदेव बैष्णवजगति नामयज्ञ इत्युच्यते । कलियुगे नामरूपयज्ञे प्रेमात्मकाहुतिप्रदानेन सर्वेश्वरस्य सविशेषत्वं प्रतिपादितं भवति । षोडशात्मकं नाम जीवनस्य मन्त्ररूपम् । 'षोड़शकं नाम्ना कलिकल्मषनाशकम्'। एतेन सर्वपापनाशो भविष्यति । सर्ववेदेषु अस्माद् श्रेष्ठतरः पन्था नास्ति । श्रीमद्भगवद्गीतायामपि अयमेव भावः अन्यदृक्कोणतो वर्णितः-

"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।

अहं त्वां सर्वपापेभ्यः मोक्षयिष्यामि मा शुचः"।।

परं नामोच्चारणविधिस्तावत् कः इति चेदुच्यते ब्रह्मणोक्तम् – 'नास्य विधिरिति। सर्वदा शुचिरशुचिर्वा पठन् ब्रह्मणः सालोकतां समीपतां सरूपतां सायुज्यतामेति'। (कलिसन्तरणोपनिषद्-२) अनेन विधिना 'उच्चारणकारी सर्वधर्मपरित्यागपापात् सद्यः शुचितामाप्नुयात्' ।